# ~ भजन मणडली (Part 1) ~

- Compiled by जय गोविन्द दास @ www.JayaGovinda.Life -

# I #

## श्रीगुर्वष्टकम्

संसार–दावानल–लीढ़–लोक, त्राणाय कारुण्यघनाघनत्वम्।
प्राप्तस्य कल्याण–गुणार्णवस्य, वन्दे गुरोः श्रीचरणारविन्दम्।।१।।
महाप्रभोः कीर्त्तन–नृत्य–गीत, वादित्रमाद्यन्मनसो रसेन।
रोमाञ्च–कम्पाश्रु–तरङ्ग–भाजो, वन्दे गुरोः श्रीचरणारविन्दम्।।२।।
श्रीविग्रहाराधन–नित्य नाना, शृङ्गार तन्मन्दिर–मार्ज्जनादौ।
युक्तस्य भक्तांश्च नियुञ्जतोऽपि, वन्दे गुरोः श्रीचरणारविन्दम्।।३।।
चतुर्विध–श्रीभगवत्प्रसाद, स्वाद्वन्नतृप्तान् हरिभक्तसङ्घान्।
कृत्वैव तृप्तिं भजतः सदैव, वन्दे गुरोः श्रीचरणारविन्दम्।।४।।
श्रीराधिका–माधवयोरपार, माधुर्य्य–लीला–गुण–रूप–नाम्नाम्।
प्रतिक्षणास्वादन लोलुपस्य, वन्दे गुरोः श्रीचरणारविन्दम्।।५।।

निकुञ्जयूनो रतिकेलिसिद्धै, यां यालिभिर्युक्तिरपेक्षणीया।
तत्रातिदाक्ष्यादतिवल्लभस्य, वन्दे गुरोः श्रीचरणारविन्दम्।।६।।
साक्षाद्धरित्वेन समस्तशास्त्रै, रुक्तस्तथा भाव्यत एव सद्भिः।
किन्तु प्रभोर्यः प्रिय एव तस्य, वन्दे गुरोः श्रीचरणारविन्दम्।।७।।
यस्य प्रसादाद्भगवत्प्रसादोः यस्याप्रसादान्न गतिः कुतोऽपि।
ध्यायंस्तुवंस्तस्य यशस्त्रिसन्ध्यं, वन्दे गुरोः श्रीचरणारविन्दम्।।८।।
श्रीमद्गुरोरष्टकमेतदुच्चै–र्ब्राह्मे मुहूर्त्ते पठति प्रयत्नात्।
यस्तेन वृन्दावन–नाथ साक्षात् सेवैव लभ्या जनुषोऽन्त एव।।९।।

# II #

भजहुँ रे मन श्रीनन्दनन्दन, अभय चरणारविन्द रे।
दुर्लभ मानव-जनम सत्संगे, तरह ए भव सिन्धु रे।।

शीत आतप, वात बरिषण, ए दिन यामिनी जागि' रे।
विफले सेबिनु कृपण दुरजन, चपल सुख-लव लागि' रे।।

ए धन, यौवन, पुत्र परिजन, इथे कि आछे परतीति रे।
कमलदल-जल, जीवन टलमल, भजहुँ हरिपद निति रे।।

श्रवण, कीर्तन, स्मरण, वन्दन, पादसेवन, दास्य रे।
पूजन, सखीजन, आत्मनिवेदन, गोविन्द दास अभिलाष रे।।

# III #

राधा कृष्ण प्राण मोर जुगल किशोर।
जीवने मरणे गति आर नाहि मोर।।
कालिन्दीर कूले केलि कदम्बेर वन।
रतन वेदीर ऊपर बसाब दु'जन।।
श्यामगौरी अङ्गे दिब (चुया) चन्दनेर गन्ध।
चामर ढुलाबो कबे हेरिबो मुखचन्द्र।।
गाँथिया मालतीर माला दिबो दोंहार गले।
अधरे तुलिया दिबो कर्पूर ताम्बूले।।
ललिता विशाखा आदि जत सखीवृन्द।
आज्ञाय करिबो सेवा चरणारविन्द।।
श्रीकृष्ण चैतन्य प्रभुर दासेर अनुदास।
सेवा अभिलाष करे नरोत्तमदास।।

# # IV #

अधरं मधुरं वदनं मधुरं नयनं मधुरं हसितं मधुरम्।
हृदयं मधुरं गमनं मधुरं मधुराधिपतेरखिलं मधुरम्।।१।।

वचनं मधुरं चरितं मधुरं वसनं मधुरं वलितं मधुरम्।
चलितं मधुरं भ्रमितं मधुरं मधुराधिपतेरखिलं मधुरम्।।२।।

वेणुर्म्मधुरो रेणुर्म्मधुरः पाणिर्म्मधुरः पादो मधुरो।
नृत्यं मधुरं सख्यं मधुरं मधुराधिपतेरखिलं मधुरम्।।३।।

गीतं मधुरं पीतं मधुरं भुक्तं मधुरं सुप्तं मधुरम्।
रूपं मधुरं तिलकं मधुरं मधुराधिपतेरखिलं मधुरम्।।४।।

करणं मधुरं तरणं मधुरं हरणं मधुरं रमणं मधुरम्।
वमितं मधुरं शमितं मधुरं मधुराधिपतेरखिलं मधुरम्।।५।।

गुञ्जा मधुरा, माला मधुरा यमुना मधुरा वीचो मधुरा।
सलिलं मधुरं कमलं मधुरं मधुराधिपतेरखिलं मधुरम्।।६।।

गोपी मधुरा लीला मधुरा युक्तं मधुरं भुक्तं मधुरम्।
हृष्टं मधुरं शिलष्टं मधुरं मधुराधिपतेरखिलं मधुरम्।।७।।

गोपा मधुरा गावो मधुरा यष्टिर्म्मधुरा सृष्टिर्म्मधुरा।
दलितं मधुरं फलितं मधुरं मधुराधिपतेरखिलं मधुरम्।।८।।

# V #

(आमि) यमुना पुलिने, कदम्ब-काननने, कि हेरिनु सखी! आज।

(आमार) श्याम वंशीधारी, मणि मञ्चोपरि, करे'लीला रसराज १

(तार) अष्टदलोपरि, श्रीराधा-श्रीहरि, अष्ट सखी परिजन २

(तार) सुगीत-नर्तने, सब सखीगणे तुषिछे युगलधने।

(तखन) कृष्णलीला हेरि, प्रकृति सुन्दरि विस्तारिछे शोभा वने ३

(आमि) घरे ना याइब, वने प्रवेशिब, ओ लीला-रसेर तरे। (आमि)
त्यजि' कुललाज, भज ब्रजराज, विनोद मिनती करे,' ४

# VI #

जय राधामाधव जय कुञ्जबिहारी।
जय गोपीजन वल्लभ जय गिरिवरधारी।।

जय यशोदानन्दन, जय ब्रजजन रञ्जन।
जय यामुनतीर–वनचारी।।

# VII #

(जय) श्रीकृष्णचैतन्य प्रभु नित्यानंद ।

श्री अद्वैत गदाधर श्रीवासादि गौर भक्तवृंद ।।

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे ।

हरे राम हरे राम राम राम हरे हरे ।।